श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्निगमान्तगुरुविषयक ऐत्सरिकै ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्निगमान्तगुरुविषयक ऐत्सरिकै ॥

ऐत्सरिकै स्वामिन् ! ऐत्सरिकै ! विजयीभव विजयीभव विजयीभव ऐत्सरिकै ! स्वामिन् ऐत्सरिकै !

श्रीमद्वेङ्कटनाथार्य !

फणिधरणिधराधीशदिव्यघण्टावतार !

विश्वोपकारकरणाय कृतावतार !

अनन्तगुणशेवधेरनन्तसूरेरात्मसम्भव !

श्रीमत्तोतारभिख्याश्रुतवरजननीगर्भवाराशिचन्द्र !

विश्वातिशायिविश्वामित्रपवित्रगोत्रभूषण !

विशुद्धविद्याविहारपुण्डरीकपुण्डरीकाक्षसोमसुत्पौत्र !

श्रीमद्वरदगुरुकृपालम्भितोद्दामवैभव !

वादिहंसांबुवाहादाचार्यादवाप्तशास्त्र !

विरचितविविधानेकदिव्यप्रबन्ध !

विंशत्यब्दे विश्रुतनानाविधविद्य !

त्रिंशद्वारं श्रावितशारीरकभाष्य !

जटावर्णचर्चाद्यनेकप्रकारत्रयीलक्षणोच्चारणे व्यासकल्प !

ज्योतिश्छन्दश्शब्दशास्त्रप्रवीण !

भरद्वाजशाण्डिल्यहारीतमुख्यस्मृतिस्तोमसूक्ष्मार्थनिर्णीतिदक्ष !

काव्यश्रेणीनाटकालङ्कृतिज्ञ !

तर्कातर्किप्रचुरकुहनानल्पजल्पप्रसङ्गक्रीडोदञ्चत्प्रतिभटशिरोदट्टकुट्टाकपाद !

सरसकविताराज्यपट्टाभिषिक्त !

शिक्षासौकर्यतुष्टिप्रचितगुरुजनानुग्रहसमिध्यमानभाषण !

सकलविद्यावाहिनीजन्मशैल !

हृत्पद्मसिंहासनरसिकहयग्रीवहेषोर्मिघोषक्षिप्तप्रत्यर्थिदर्प !

कवितार्किककळभव्रजकबलीकृतिसिंह !

अन्तर्मुखमुखरहयग्रीवहेषोर्मिघोषप्रक्षुभ्यद्वैरिविद्वत्प्रणमितमकुटीराजिनी - राजिताङ्घ्रे !

श्वसितावधूतपरवादिवैभव !

आत्रेयरामानुजदेशिकेन्द्रपदांबुजद्वन्द्वपरागदैव !

यतीश्वरसरस्वतीसुरभिताशय !

अध्यासीनतुरङ्गवक्त्रविलसज्जिह्वाग्रसिंहासन !

श्रीमल्लक्ष्मणयोगीन्द्रसिद्धान्तविजयध्वज !

विद्याविनीतजनताविहितानुसार !

व्यानम्रशिष्यजनरक्षणजागरूक !

इच्छासारथ्यसत्यापितगुणकमलाकान्तगीतान्तसिद्ध्यच्छुद्धान्ताचारशुद्ध !

श्रीसंयमीन्द्रसिद्धान्तनिधिरक्षैकदीक्षित !

दिक्सौधाबद्धजैत्रध्वजपटपवनस्फातिनिर्धूततत्तत्सिद्धान्तस्तोमतूलस्तबक - विगमनव्यक्तसद्वर्तनीक !

मृषामतविषानलज्वलितजीवजीवनौषध !

कुदृष्टिकुहनामुखे निपततः परब्रह्मणः करग्रहविचक्षण !

सुधाशनसुदुर्ग्रहश्रुतिसमष्टिमुष्टिन्धय !

शमितोदयशङ्करादिगर्व !

तुरगवदनतेजोबृंहिताश्चर्यशक्ते !

प्रज्ञादौर्जन्यगर्जत्प्रतिकथकवचस्तूलवातूलवाग्विलास !

तत्तद्बहुसमयिसमक्षं बद्धजैत्रध्वज !

श्रद्धातव्यशरण्यदंपतिदयादिव्यापगाव्यापक त्रय्यन्तप्रतिन - न्दनीयविविधोदन्त !

दुग्धोदन्वदपत्यसन्निधिसदासामोददामोदरश्लक्ष्णालोकनदौर्लळित्य - ललितोन्मेष !

निखिलकुमतिमायाशर्वरीबालसूर्य !

श्रीपद्मनाभनाभीनाळीकस्पृहणीयसौरभसारस्वत !

स्पर्द्धाविप्लवविप्रलम्भपदवीवैदेशिक !

यतिक्षितिभृदन्तिकोपासनप्रभावपरिपक्त्रिमप्रमितभारतीवैभव !

निगमजलधिवेलापूर्णचन्द्र !

रङ्गेशभक्तजनमानसराजहंस !

यतिसार्वभौमपदसात्कृताशय !

जनिपथपरिवृत्तिश्रान्तविश्रान्तिकल्पवृक्ष !

वेदान्तवृद्धविहिताञ्जलिगोचर !

विश्वान्तरान्धतमसक्षपणप्रवीण !

विस्तारसंसृतिमहार्णवकर्णधार !

विष्णौ विष्ण्वाश्रितेषु प्रकटितविनयप्रेमशेषत्ववृत्ते !

वेधोमुखैरपि सुरैर्विहितप्रणाम !

श्रीरङ्गराजदिव्याज्ञालब्धवेदान्ताचार्यपद !

तत्सहधर्मिणीकृपात्ताखिलतन्त्रस्वातन्त्र्य !

दिशासौधश्रेणीदृढघटितजैत्रध्वजपटीपरामर्शभ्रश्यत्प्रतिमतनिराबाध -
निगम !

कवितार्किकसिंह इति प्रख्यातगुणसमाख्य !

शठरिपुशुकव्यासप्राचेतसादिनिबन्धनश्रमपरिणतश्रद्धा -
शुद्धाशय !

प्रपदनमये विद्याभेदे प्रतिष्ठितमानस !

प्रातस्त्याम्भोजपाळीमधुरमधुझरीमाधुरीधुर्यवाणीभव्यप्रचार !

सर्वतन्त्रसङ्कटप्रशमनविशङ्कटमतिविलास !

अनादिमायामहावर्तबंभ्रम्यमाणबाह्यकथाकरम्भावनमथनगन्धसिन्दुर !

दुर्वादिगर्वसर्वस्वनिर्वापक !

निर्मलगुरुसकाशनिर्धारितनिगमान्तहृदय !

छात्रजननिबद्धजैत्रध्वजप्रसाधितदशदिशासौध !

निगमान्तेषु निरूढगौरव !

महितविविधच्छात्रश्रेणीमनोरथसारथे !

देवाधिराजचरणारविन्दयुगळानुरागमहिमावदातहृदयारविन्द !

युतनवपर्वपरमपदसोपानकारिन् !

यतिपतिसंप्रदायनिरपायधनोपचित !

सत्संप्रदायक्रमसमधिगताशेषवर्णार्हवेदश्रद्धाशुद्धाशय !

करिशिखरिपतिनगरसुचरितकृतवास !

यतिराजमहानसपरिमळपरिवाहवासितवेदान्तोदयन -
संप्रदायपरिपोषक !

अक्षुद्राचार्यशिक्षाशतगुणितमते !

शुष्कोपन्यासशिक्षापटिमकटुरटद्वैरिविद्वत्करोटीकुट्टाकत्क्रीडाष्टापदकटक -
भृद्धामपाद !

यतिपतिच्छात्रहस्ताग्रनृत्यन्नाराचन्यासरेखासहचरितमते !

शेषाशीविषदन्तपङ्क्तिसुषुमासच्छायतर्कक्रम !

विमतकथ कव्यावक्रोशीविकत्थनलम्पनव्यसनशमनव्यक्तोत्सेध !

**प्रज्ञाधम्मिल्लमल्लीमरिमळमिळितप्राज्ञसेवासमुद्यच्छुद्धालोकोज्ज्वल !**

**सासूयतत्तत्कुमतिमतसमुन्मूलन !**

**जिह्वासिंहासनाग्रस्थितिरसिकहयग्रीवसाटोपहेषाघोषोन्मेषप्रनष्टाखिल - कुमतिगणाखर्वगर्वातिरेक !**

**संसाराम्भोधिमज्जत्सकलतनुभृदुज्जीवनैकान्तावतार !**

**विजयीभव विजयीभव विजयीभव ऐत्सरिकै ! स्वामिन् ! ऐत्सरिकै !**

॥ इति श्रीमन्निगमान्तगुरुविषयक ऐत्सरिकै समाप्तम् ॥